# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

०१८ – इष्टकर्म - १

३१ - ०१ - २०१९

# गतकक्ष्यायाम् ...

- व्यस्तविधौ उदाहरणद्वयम्

# अस्यां कक्ष्यायाम् ...

- इष्टकर्म

# इष्टकर्म

उद्देशकालापवदिष्टराशिः क्षुण्णो हृतोंऽशै रहितो युतो वा ।
इष्टाहतं दृष्टमनेन भक्तं राशिर्भवेत् प्रोक्तमितीष्टकर्म ।।

अन्वयः - उद्देशकालापवत् इष्टराशिः क्षुण्णः, हृतः, अंशैः रहितः युतः वा । अनेन इष्टाहतम्, इष्टभक्तं राशिः भवेत् इति इष्टकर्म प्रोक्तम् ।।

क्षुण्ण¦ त्रि॰ (क्षुद् सम्पेषणे + कर्मणि क्तः)
१ अभ्यस्ते २ विहते ३ चूर्णीकृते

बुद्धिविलासिनी -

अथेष्टकर्मणि केवलगुणनभजनांशानां विद्यमानत्वाद्विलोमक्रियानन्तरम् इष्टकर्म इन्द्रवज्रया आह - उद्देशकालापवदिति । उद्देशकस्यालापो वचनं तेन यथा पृष्टं तद्वदिष्टकल्पितराशिः क्षुण्णो वा हृतो वा स्वांशैरंशांशैर्वा रहितो वा युतो वा कार्यः । इष्टाहतं दृष्टमनेन भक्तं सद्यत्फलं स राशिः स्यात् । इतीष्टकर्म प्रोक्तमन्वर्थं नाम । अत्रोपपत्तिः स्पष्टा । उद्देशकालापवदिष्टराशेर्गुणनादौ कृते सति यत्स्यात्तेनानुपातः । यद्यनेनेष्टतुल्यो मूलराशिर्लभ्यते तदा प्रष्टुरुद्दिष्टेन क इति । अत उक्तमुद्देशकालापवदित्यादि । अतोऽस्मिन्वर्गादावुद्दिष्टे त्रैराशिकासम्भवान्नेष्टकर्मेत्यर्थसिद्धम् ।

अथ सूत्रव्याप्तिदर्शनार्थमुदाहरणचतुष्टयम् । तत्र प्रथमगुणकहरस्त्वांशराश्यंशेषूदाहरणमनुष्टुभाऽऽह - पञ्चघ्नः स्वत्रिभागोन इति ।

पञ्चघ्नः स्वत्रिभागोनो दशभक्तः समन्वितः ।
राशित्र्यंशार्धपादैः स्यात् को राशिर्द्व्यूनसप्ततिः ॥

(क्रियाक्रमकर्याम्) न्यासः
गुणः- ५,स्वांश-ऋणम् - १/३, हारः - १०, राश्यंशाः - १/३, १/२, १/४ दृष्टम् - ६८
अत्र किलेष्टराशिः ३



पञ्चघ्नः स्वत्रिभागोनो दशभक्तः समन्वितः ।
राशित्र्यंशार्धपादैः स्यात् को राशिर्द्व्यूनसप्ततिः ।।

इष्टराशिः = ३

पञ्चघ्नः = १५

स्वत्रिभागोनः = १५ – $\frac{१}{३}$(१५) = १५ - ५ = १०

दशभक्तः = १

कल्पितराशेस्त्र्यंशार्धपादैरेभिः समन्वितः = $१+\frac{३}{३}+\frac{३}{२}+\frac{३}{४} = \frac{१७}{४}$

अनेन दृष्टम् ६५ इष्टाहतं भक्तम् = (६८ x ३) / $\frac{१७}{४}$ = ४८

# त्रैराशिकसोपानम्

इष्टराशिः/ कल्पितराशिः → प्राप्तं फलम्

पृष्टराशिः → दृष्टम् (उद्देशके दत्तं फलम्)

$$३ \rightarrow \frac{१७}{४}$$

$$? \rightarrow ६८$$

$$? = \frac{(६८ x ३)}{(\frac{१७}{४})}$$

एवं यत्रोदाहरणे राशिः केनचिद्गुणितो विभक्तो वांशेन रहितो युतो वा तत्रेष्टं राशिं प्रकल्प्य तस्मिन्नुद्देशकालापवत् कर्मणि कृते यन्निष्पद्यते तेन भजेद्दृष्टमिष्टगुणम् । फलं राशिः स्यात् ।

* अत्र प्रथममुद्दिष्टस्यैव राशेरंशाः शोध्यन्ते क्षिप्यन्ते च न तु तत्र तत्र दृष्टस्येति ।

अथ दृश्यजात्युदाहरणम् -

यत्रोद्दिष्टराशेरेव भागविशोधनादौ कृते शेषो दृश्यते, तत्र दृश्यजातिः ।

अमलकमलराशेस्त्र्यंशपञ्चांशषष्ठैस्त्रिनयनहरिसूर्या येन तुर्येण चार्या ।
गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसङ्ख्यां क्षिप्रमाख्याहि तस्य ।।

अमलकमलराशेस्त्र्यंशपञ्चांशषष्ठैस्त्रिनयनहरिसूर्या येन तुर्येण चार्या ।
गुरुपदमथ षड्भिः पूजितं शेषपद्मैः सकलकमलसङ्ख्यां क्षिप्रमाख्याहि तस्य ।।

अत्र त्र्यंशपञ्चांशषष्ठतुर्या उद्दिष्टराशेरेवांशा इति दृश्यजातित्वम् । तत्र त्र्यंशपञ्चांशषष्ठतुर्याः $\frac{१}{३}, \frac{१}{५}, \frac{१}{६}, \frac{१}{४}$ क्रमेण ।
एते समच्छेदीकृताः $\frac{२०}{६०}, \frac{१२}{६०}, \frac{१०}{६०}, \frac{१५}{६०}$ ।
एतेषु कल्पितरूपात् सवर्णीकृतात् विशुद्धेषु शिष्टं $\frac{३}{६०} = (१ - \frac{५७}{६०})$ ।
त्रिभिरपवर्तितम् $\frac{१}{२०}$। अनेन दृष्टं ६ , इष्टेन (१) गुणितं विभजेत् (६ x १)/ $\frac{१}{२०}$
तत्र लब्ध उद्दिष्टराशिः १२० ।

# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

०१८ – इष्टकर्म - १

३१ - ०१ - २०१९